अष्टादशः पाठः

# महाकविः कालिदासः



कविकुलगुरुं कालिदासम् अस्मिन्युगे को न जानाति। विद्वद्भिः विश्वस्य साहित्यकारेषु अस्य गणना कृता। बहवः विद्वांसः उज्जयिन्यामेव अस्य जन्मभूमिं मन्यन्ते। अनेनैव हेतुना तस्य कृतिषु उज्जयिन्याः वर्णनं सञ्जातम्। उक्तम् च– ''विक्रमादित्यस्य नवरत्नेषु कालिदासः एकः''।

कथ्यते–कालिदासः महामूर्खः आसीत्। राज्ञः शारदानन्दस्य विद्योत्तमा नाम्नी एका विदुषी कन्या आसीत्। सा स्वविद्यया अतिदर्पशीला आसीत्। सा प्रतिज्ञातवती यत् शास्त्रार्थे यः मां पराजेष्यति, तेन सह विवाहं करिष्यामीति। तां प्रतिज्ञां श्रुत्वा बहवः विद्वांसः आगच्छन् तया सह शास्त्रार्थे सर्वे पराजिताः अभवन्। ईर्ष्यावशात् ते राजकन्यायाः विवाहं महामूर्खेण सह सम्पादयितुं व्यचारयन्। ते मूर्खस्य अन्वेषणार्थं निर्गताः। सहसा कस्यचिद् वृक्षस्य शाखायां स्थित्वा तां शाखां कर्तयन्तम् एकं मूर्खम् अपश्यन्। तस्मात् वृक्षात् अधः अवतीर्य ते अवदन् तं भो पुरुष! वयं परमसुन्दर्या राजकन्यया सह तव विवाहं कर्त्तुमिच्छामः। वयं स्वगुरुरुपेण तव परिचयं दास्यामः परम् त्वं किमपि न वक्ष्यसि। तं मूर्खं नीत्वा विद्वांसः राजकन्यायाः समीपम् आगतवन्तः अवदन् च। एषोऽस्माकं गुरुः सकलशास्त्रपारङ्गतः विद्वान् चास्ति परन्तु सम्प्रति मौन–व्रतं धारयति। तदा राजकन्या विद्योत्तमा एकाम् अङ्गुलिकाम् उत्थाय दर्शितवती. यस्यार्थः एको ब्रह्म द्वितीयो नास्ति। तां दृष्ट्वा महामूर्खः कालिदासः व्यचारयत्। एषा मम एकं–नेत्रं स्फोटयितुम् इच्छति अहं तु तव द्वे नेत्रे स्फोटयिष्यामि इति मत्वा स्वकीये द्वे अङ्गुलिके दर्शितवान्। अन्ते राजकन्या पराजिता सञ्जाता। पश्चात् कालिदासेन सह विद्योत्तमायाः परिणयः जातः ।

एकदा रात्रौ उष्ट्रस्य ध्वनिःअभवत्। ध्वनिं श्रुत्वा तस्य भार्या अयं ध्वनिः केन कृतः इति अपृच्छत्। कालिदासेन उष्ट्रशब्दस्य स्थाने उट्र इति शब्दः उच्चारितः विद्योतमा ज्ञातवती यत् एषः मूर्खः अस्ति। सा कालिदासस्य अपमानं कृत्वा गृहात् निष्कासितवती। कालिदासः खिन्नो भूत्वा देवीम् अराधयत्। तदनुग्रहेण सः महान् विद्वान् अभवत् यदा कालिदासः ज्ञानं प्राप्य गृहं प्रत्यावर्तत तदा द्वारं पिहितम् आसीत्। सः अकथयत्– ''अनावृतकपाटं द्वारं देहि।'' भार्या अपृच्छत्– ''अस्ति कश्चिद्वाग्विशेषः?'' कालिदासः स्वप्रतिभायाः पत्नीम् अतोषयत्। पत्न्याः शब्दत्रयम् आश्रित्य कालिदासः त्रयाणां–काव्यानां रचनामकरोत्।

यथा–अस्ति इति शब्देन कुमारसम्भवम्– अस्त्युतरस्यां दिशि देवतात्मा, कश्चित्इति शब्देन मेघदूतम्–''कश्चित् कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः'' तथा वाक् इति शब्देन–रघुवंश महाकाव्यम्– ''वागर्थाविवसम्पृक्तौ''। तदनन्तरं कालिदासेन चतुर्णां ग्रन्थानां रचना कृता। कालिदासेन मुख्याः सप्तग्रन्थाः विरचिताः। एतेषु द्वे महाकाव्ये रघुवंशमहाकाव्यं कुमारसम्भवञ्च, द्वे खण्डकाव्ये मेघदूतं ऋतुंसंहारञ्च। त्रीणि नाटकानि अभिज्ञानशाकुन्तलं, विक्रमोर्वशीयं मालविकाग्निमित्रञ्च। तेषु अभिज्ञानशाकुन्तलं श्रेष्ठतमा रचनाऽस्ति। जर्मनकविः गेटे महोदयेन अस्य काव्यस्य प्रशंसा कृता। अस्य ग्रन्थस्य विषये एका सूक्तिः प्रचलिता

''काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला''

कालिदासस्य भाषा अलङ्कारिकी अस्ति। उपमा अलङ्कारस्य प्रयोगे सः प्रवीणोऽस्ति। उक्तं च– ''उपमा कालिदासस्य'' एतेषु काव्येषु प्रकृतेः मनोहराणि चित्राणि लक्ष्यन्ते। तस्य प्रकृतेः अनुरागः आसीत्।

कविकुलशिरोमणिमहाकविकालिदासस्य काव्यरचना विश्वस्य निधिः इति मन्यन्ते जनाः।

अधुना महाकविकालिदासः पार्थिवशरीरेण नास्ति तथापि यशःकायेन विद्यते। विद्वांसः कथयन्ति –

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति येषां यशःकाये जरामरणजं भयम्।।

## शब्दार्थाः

विद्वद्भिः = विद्वानों के द्वारा। मन्यन्ते = मानते हैं। सञ्जातम् = हुआ है। नाम्नी = नाम। स्वविद्यया = अपनी विद्या के कारण। दर्पशीला आसीत् = घमण्डी थी। विवाहं करिष्यामि = विवाह करूँगी। व्यचारयत् = विचार किया। अन्वेषणार्थं = ढूँढ़ने के लिए। निर्गताः = निकल पड़े। स्थित्वा = बैठकर। कर्तयन्तम् = काटते हुए । अवतीर्य = उतारकर । कर्त्तुमिच्छामः = कराना चाहते हैं। वक्ष्यसि = बोलोगे। उत्थाय = उठाकर। स्फोटयितुम् = फोड़ने के लिए। उष्ट्रस्य = ऊंट की। ज्ञातवती = जान गई। खिन्नो भूत्वा = दुःखी होकर। प्रत्यावर्तत् = लौटा। पिहितम् = बन्द। अस्तिकश्चिद्वाग्विशेषः? = वाणी में कुछ विशेषता है ? अस्त्युतरस्यां दिशि देवतात्मा = उत्तर दिशा में देवताओं की आत्मा है। स्वाधिकारात्प्रमत्तः = अपने काम में प्रमाद करने से। वागार्थविवसंपृक्तौ = शब्द और अर्थ के समान मिला हुआ। अलङ्कारिक = अलङ्कार युक्त। यशः कायेन = यश रूपी शरीर से। जयन्ति = जीवित रहते हैं। जरामरणजं = बुढ़ापे और मृत्यु

## अभ्यासप्रश्नाः

(1) संस्कृत में उत्तर लिखिए –

(क) कालिदासस्य जन्मभूमिः कुत्र अस्ति ?
(ख) के मूर्खान्वेषणार्थं निर्गताः ?
(ग) कया सह कालिदासस्य विवाहः जातः ?
(घ) कस्या अनुग्रहेण कालिदासः विद्वान् अभवत् ?
(ङ) कालिदासेन केषां ग्रन्थानां रचना कृता ?

(2) उचित सम्बन्ध जोड़िए –

| | | |
|---|---|---|
| (1) कालिदासस्य जन्मभूमिः | – | अभिज्ञानशाकुन्तलम् |
| (2) विक्रमादित्यस्य नवरत्नेषु | – | मेघदूतम् |
| (3) विद्योत्तमायाः पिता | – | उज्जयिनी |
| (4) कालिदासस्य श्रेष्ठकृति | – | रघुवंशम् |
| (5) खण्डकाव्यम् | – | कालिदासः |
| (6) महाकाव्यम् | – | शारदानन्दनृपः |

(3) रिक्त स्थानों की पूर्ति कीजिए –

(अ) विक्रमादित्यस्य ................ कालिदासः एकः।
(ब) शास्त्रार्थे यः मां ...................... तेन सह विवाहं करिष्यामि।
(स) एकदा रात्रौ ..................... ध्वनिम् अभवत्।
(द) जर्मनकविना .................. अस्य काव्यस्य प्रशंसा कृता।

(4) सन्धि विच्छेद कर प्रकार बताइए–

तदनुग्रहेण
कश्चित्
वाग्विशेषः
सूक्तिः
अस्त्युत्तरस्याम्

(5) दिये गए सामासिक शब्दों के विग्रह कर नाम लिखिए –

नवरत्नम्
राजकन्या
शब्दत्रयम्

QLUZP9